# Avyakta Upanishad

# અવ્યક્તોપનિષત્

## Document Information

Text title : Avyakta Upanishad

File name : avyakta.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 68 / 108; Sama Veda - Vaishnava upanishad

Latest update : July 27, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અવ્યક્તોપનિષત્

(અવ્યક્તનૃસિંહોપનિષત્)

(સામવેદીયા)

સ્વાજ્ઞાનાસુરરાડ્ગ્રાસસ્વજ્ઞાનનરકેસરી ।
પ્રતિયોગિવિનિર્મુક્તં બ્રહ્મમાત્રં કરોતુ મામ્ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં
બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણ-
મસ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે
મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

(સૃષ્ટેઃ પુરા નિર્વિશેષબ્રહ્મસ્થિતિઃ)

હરિઃ ૐ । પુરા કિલેદં ન કિઞ્ચનાસીન્ન દ્યૌર્નાન્તરિક્ષં
ન પૃથિવી કેવલં જ્યોતીરૂપમનાધનન્તમનણ્વસ્થૂલરૂપમરૂપં
રૂપવદવિજ્ઞેયં જ્ઞાનરૂપમાનન્દમયમાસીત્ ।

(પરમેષ્ઠિપ્રાદુર્ભાવઃ)

તદનન્યત્તદ્દ્વેધાભૂદ્ધરિતમેકં રક્તમપરમ્ ।
તત્ર યદ્રક્તં તત્પુંસો રૂપમભૂત્ । યદ્ધરિતં તન્માયાયાઃ ।
તૌ સમગચ્છતઃ । તયોર્વીર્યમેવમનન્દત્ । તદવર્ધત ।
તદણ્ડમભૂધૈમમ્ । તત્પરિણમમાનમભૂત્ । તતઃ
પરમેષ્ઠી વ્યજાયત ।

(પરમેષ્ઠિનઃ સ્વકૃત્યજિજ્ઞાસા)

સોઽભિજિજ્ઞાસત કિં મે કુલં કિં મે

કૃત્યમિતિ । તં હ વાગદૃશ્યમાનાભ્યુવાચ ભોભો પ્રજાપતે
ત્વમવ્યક્તાદુત્પન્નોऽસિ વ્યક્તં તે કૃત્યમિતિ । કિમવ્યક્તં
યસ્માદહમાસિષમ્ । કિં તદ્વ્યક્તં યન્મે કૃત્યમિતિ ।
સાબ્રવીદવિજ્ઞેયં હિ તત્સૌમ્ય તેજઃ । યદવિજ્ઞેયં તદવ્યક્તમ્ ।
તચ્ચેજ્જિજ્ઞાસસિ માવગચ્છેતિ । સ હોવાચ કૈષા ત્વં
બ્રહ્મવાગ્યદસિ શંસાત્માનમિતિ । સા ત્વબ્રવીત્તપસા માં
વિજિજ્ઞાસસ્વેતિ । સ હ સહસ્રં સમા બ્રહ્મચર્યમધ્યુવાસાધ્યુવાસ ॥ ૧॥

દ્વિતીયઃ ખણ્ડઃ

(પરમેષ્ઠિનઃ આનુષ્ટુભીવિદ્યાદર્શનમ્)

અથાપશ્યદૃચમાનુષ્ટુભીં પરમાં વિદ્યાં
યસ્યાઙ્ગાન્યન્યે મન્ત્રાઃ । યત્ર બ્રહ્મ પ્રતિષ્ઠિતમ્ ।
વિશ્વેદેવાઃ પ્રતિષ્ઠિતાઃ । યસ્તાં ન વેદ કિમન્યૈર્વેદૈઃ
કરિષ્યતિ ।

(આનુષ્ટુભીવિદ્યયા નૃસિંહદર્શનમ્)

તાં વિદિત્વા સ ચ રક્તં જિજ્ઞાસયામાસ ।
તામેવમનૂચાનાં ગાયન્નાસિષ્ટ । સહસ્રં સમા
આદ્યન્તનિહિતોઙ્કારેણ પદાન્યગાયત્ । સહસ્રં
સમાસ્તથૈવાક્ષરશઃ । તતોऽપશ્યજ્જ્યોતિર્મયં
શ્રિયાલિઙ્ગિતં સુપર્ણરથં શેષફણાચ્છદિતમૌલિં
મૃગમુખં નરવપુષં શશિસૂર્યહવ્યવાહનાત્મકનયનત્રયમ્ ।

(નૃસિંહસ્તુતિઃ)

તતઃ પ્રજાપતિઃ પ્રણિપપાત નમોનમ ઇતિ । તથૈવર્ચાથ તમસ્તૌત્ ।
ઉગ્રમિત્યાહ ઉગ્રઃ ખલુ વા એષ મૃગરૂપત્વાત્ । વીરમિત્યાહ
વીરો વા એષ વીર્યવત્ત્વાત્ । મહાવિષ્ણુમિત્યાહ મહતાં વા અયં
મહાન્રોદસી વ્યાપ્ય સ્થિતઃ । જ્વલન્તમિત્યાહ જ્વલન્નિવ ખલ્વસાવવસ્થિતઃ ।
સર્વતોમુખમિત્યાહ સર્વતઃ ખલ્વયં મુખવાન્વિશ્વરૂપત્વાત્ ।
નૃસિંહમિત્યાહ યથા યજુરેવૈતત્ । ભીષણમિત્યાહ ભીષા વા
અસ્માદાદિત્ય ઉદેતિ ભીતશ્ચન્દ્રમા ભીતો વાયુર્વાતિ ભીતોऽગ્નિર્દહતિ
ભીતઃ પર્જન્યો વર્ષતિ । ભદ્રમિત્યાહ ભદ્રઃ ખલ્વયં શ્રિયા જુષ્ટઃ ।
મૃત્યોર્મૃત્યુમિત્યાહ મૃત્યોર્વા અયં મૃત્યુરમૃતત્વં પ્રજાનામન્નાદાનામ્ ।

નમામીત્યાહ યથા યજુરેવૈતત્ । અહમિત્યાહ યથા યજુરેવૈતત્ ॥ ૨॥

(ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતેજસમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહમ્ ॥)

તૃતીય ખણ્ડઃ

(વ્યક્તસ્વરૂપમ્)

અથ ભગવાંસ્તમબ્રવીત્પ્રજાપતે પ્રીતોઽહં કિં તવેપ્સિતં
તદાશંસેતિ । સ હોવાચ ભગવન્નવ્યક્તાદુત્પન્નોઽસ્મિ
વ્યક્તં મમ કૃત્યમિતિ પુરાશ્રાવિ । તત્રાવ્યક્તં ભવાનિત્યજ્ઞાયિ
વ્યક્તં મે કથયેતિ । વ્યક્તં વૈ વિશ્વં ચરાચરાત્મકમ્ ।
યદ્વ્યજ્યતે તદ્વ્યક્તસ્ય વ્યક્તત્વમિતિ ।

(જગત્સૃષ્ટ્યુપાયો ધ્યાનયજ્ઞઃ)
સ હોવાચ ન શક્નોમિ જગત્સ્રષ્ટુમુપાયં મે કથયેતિ ।
તમુવાચ પુરુષઃ પ્રજાપતે શ‍ૃણુ
સૃષ્ટેરુપાયં પરમં યં વિદિત્વા સર્વં જ્ઞાસ્યસિ ।
સર્વત્ર શક્ષ્યસિ સર્વં કરિષ્યસિ । મય્યગ્નૌ સ્વાત્માનં
હવિર્ધ્યાયેત્તયૈવાનુષ્ટુભર્ચા । ધ્યાનયજ્ઞોઽયમેવ ।

(ધ્યાનયજ્ઞમહિમા)

એતદ્વૈ મહોપનિષદ્દેવાનાં ગુહ્યમ્ । ન હ વા એતસ્ય સામ્ના
નર્ચા ન યજુષાર્થો નુ વિદ્યતે । ય ઇમા વેદ સ સર્વાન્કામાનવાપ્ય
સર્વાંલ્લોકાઞ્જિત્વા મામેવાભ્યુપૈતિ ન સ પુનરાવર્તતે ય એવં વેદેતિ ॥ ૩॥

ચતુર્થઃ ખણ્ડઃ

(ધ્યાનયજ્ઞેન પરમેષ્ઠિનઃ સર્વજ્ઞત્વાદિલાભઃ)

પ્રજાપતિસ્તં યજ્ઞાયં વસીયાંસમાત્માનં મન્યમાનો
મનોયજ્ઞેનેજે । સપ્રણવયા તયૈવર્ચા હવિર્ધ્યાત્વાત્માન-
માત્મન્યગ્નૌ જુહુયાત્ । સર્વમજાનાત્સર્વત્રાશકત્સર્વમકરોત્ ।

(અન્યસ્યાપિ ધ્યાનયજ્ઞેન સર્વજ્ઞત્વાદિલાભઃ)

ય એવં વિદ્વાનિમં ધ્યાનયજ્ઞમનુતિષ્ઠેત્સ સર્વજ્ઞોઽનન્તશક્તિઃ
સર્વકર્તા ભવતિ । સ સર્વાઁલ્લોકાઞ્જિત્વા બ્રહ્મ પરં પ્રાપ્નોતિ ॥ ૪॥

પઞ્ચમઃ ખણ્ડઃ

ઇ(લોકત્રયાદિસૃષ્ટિઃ)

અથ પ્રજાપતિર્લોકાન્સિસૃક્ષમાણસ્તસ્યા એવ વિદ્યાયા યાનિ
ત્રિંશદક્ષરાણિ તેભ્યસ્ત્રીંૅલ્લોકાન્ । અથ દ્વે દ્વે અક્ષરે
તાભ્યામુભયતો દધાર । તસ્યા એવર્ચો દ્વાત્રિંશદ્ભિરક્ષરૈ-
સ્તાન્દેવાન્નિર્મમે । સર્વૈરેવ સ ઇન્દ્રોઽભવત્ । તસ્માદિન્દ્રો
દેવાનામધિકોઽભવત્ । ય એવં વેદ સમાનાનામધિકો ભવેત્ ।

(વસુરુદ્રાદિત્યસૃષ્ટિઃ)

તસ્યા એકાદશભિઃ પાદૈરેકાદશ રુદ્રાન્નિર્મમે । તસ્યા
એકાદશભિરેકાદશાદિત્યાન્નિર્મમે । સર્વૈરેવ સ વિષ્ણુરભવત્ ।
તસ્માદ્વિષ્ણુરાદિત્યાનામધિકોઽભવત્ । ય એવં વેદ સમાનાનામધિકો
ભવેત્ । સ ચતુર્ભિશ્ચતુર્ભિરક્ષરૈરષ્ટૌ વસૂનજનયત્ ।
સ તસ્યા આદ્યૈર્દ્વાદશભિરક્ષરૈર્બ્રાહ્મણમજનયત્ ।
દશભિર્દશભિર્વિટ્ક્ષત્રે । તસ્માદ્બ્રાહ્મણો મુખ્યો ભવતિ ।
એવં તન્મુખ્યો ભવતિ ય એવં વેદ ।
તૂષ્ણીં શૂદ્રમજનયત્તસ્માચ્છૂદ્રો નિર્વિદ્યોઽભવત્ ।

(અહોરાત્રસૃષ્ટિઃ)

ન વેદં ઇવા ન નક્તમાસીદવ્યાવૃતમ્ ।
સ પ્રજાપતિરાનુષ્ટુભાભ્યામર્ધર્ચાભ્યામહોરાત્રાવકલ્પયત્ ।

(વેદછન્દસ્સૃષ્ટિઃ)

તતો વ્યૈચ્છત્ વ્યેવાસ્મા ઉચ્છતિ । અથો તમ એવાપહતે ।
ઋગ્વેદમસ્યા આદ્યાત્પાદાદકલ્પયત્ । યજુર્દ્વિતીયાત્ ।
સામ તૃતીયાત્ । અથર્વાઙ્ગિરસશ્ચતુર્થાત્ યદષ્ટાક્ષરપદા
તેન ગાયત્રી । યદેકાદશપદા તેન ત્રિષ્ટુપ્ ।
યચ્ચતુષ્પદા તેન જગતી યદ્દ્વાત્રિંશદક્ષરા તેનાનુષ્ટુપ્ ।
સા વા એષા સર્વાણિ છન્દાંસિ । ય ઇમાં સર્વાણિ છન્દાંસિ વેદ ।
સર્વં જગદાનુષ્ટુભ એવોત્પન્નમનુષ્ટુપ્પ્રતિષ્ઠિતં
પ્રતિતિષ્ઠતિ યશ્ચૈવં વેદ ॥ ૫॥

ષષ્ઠઃ ખણ્ડઃ

(સ્ત્રીપુરુષમિથુનસૃષ્ટિઃ)

અથ યદા પ્રજાઃ સૃષ્ટા ન જાયન્તે પ્રજાપતિઃ કથં
ન્વિમાઃ પ્રજાઃ સૃજેયમિતિ ચિન્તયન્નુગ્રમિતીમામૃચં
ગાતુમુપાક્રામત્ । તતઃ પ્રથમપાદાદુગ્રરૂપો દેવઃ
પ્રાદુરભૂત્ એકઃ શ્યામઃ પુરતો રક્તઃ પિનાકી સ્ત્રીપુંસરૂપસ્તં
વિભજ્ય સ્ત્રીષુ તસ્ય સ્ત્રીરૂપં પુંસિ ચ પુંરૂપં વ્યધાત્ ।
ઉભાભ્યાનંશાભ્યાં સર્વમાદિષ્ટઃ । તતઃ પ્રજાઃ પ્રજાયન્તે ।
ય એવં વેદ પ્રજાપતેઃ સોઽપિ ત્ર્યમ્બક ઇમામૃચમુદ્ગાય-
ન્નુદ્ગ્રથિતજટાકલાપઃ પ્રત્યો અગ્જ્યોતિષ્યાત્મન્યેવ રન્તારમિતિ ।

(ઇન્દ્રાખ્યાયિકા)

ઇન્દ્રો વૈ કિલ દેવાનામનુજાવર આસીત્ । તં પ્રજાપતિરબ્રવીદ્ગચ્છ
દેવાનામધિપતિર્ભવેતિ । સોઽગચ્છત્ । તં દેવા ઊચુરનુજાવરોઽસિ
ત્વમસ્માકં કુતસ્ત્વાધિપત્યમિતિ । સ પ્રજાપતિમભ્યેત્યોવાચૈવં
દેવા ઊચુરનુજાવરસ્ય કુતસ્તવાધિપત્યમિતિ । તં પ્રજાપતિરિન્દ્રં
ત્રિકલશૈરમૃતપૂર્ણૈરાનુષ્ટુભાભિમન્ત્રિતૈરભિષિચ્ય તં
સુદર્શનેન દક્ષિણતો રરક્ષ પાઞ્ચજન્યેન વામતો દ્વયેનૈવ
સુરક્ષિતોઽભવત્ । રૌક્મે ફલકે સૂર્યવર્ચસિ મન્ત્રમાનુષ્ટુભં
વિન્યસ્ય તદસ્ય કણ્ઠે પ્રત્યમુઞ્ચત્ । તતઃ સુદુર્નિરીક્ષોઽભવત્ ।
તસ્મૈ વિદ્યામાનુષ્ટુભીં પ્રાદાત્ । તતો દેવાસ્તમાધિપત્યાયાનુમેનિરે ।
સ સ્વરાડભૂત્ । ય એવં વેદ સ્વરાડ્ ભવેત્ । સોઽમન્યત પૃથિવીમપિ
કથમપાં જયેયમિતિ । સ પ્રજાપતિમુપાધાવત્ ।
તસ્માત્પ્રજાપતિઃ કમઠાકારમિન્દ્રનાગભુજગેન્દ્રાધારં
ભદ્રાસનં પ્રાદાત્ । સ પૃથિવીમભ્યજયત્ । તતઃ સ
ઉભયોર્લોકયોરધિપતિરભૂત્ । ય એવં વેદોભયોર્લોકયોરધિપતિર્ભવતિ ।
સ પૃથિવીં જયતિ ।

(પરમાત્મપ્રતિષ્ઠાસાધનમ્)

યો વા અપ્રતિષ્ઠિતં શિથિલં ભ્રાતૃવેભ્યો
વસીયાન્ભવતિ યશ્ચૈવં વેદ યશ્ચૈવં વેદ ॥ ૬॥

સપ્તમઃ ખણ્ડઃ

(એતદ્વિદ્યાઽધ્યયનફલમ્)

ય ઇમાં વિદ્યામધીતે સ સર્વાન્વેદાનધીતે । સ સર્વૈઃ ક્રતુભિર્યજતે ।
સ સર્વતીર્થેષુ સ્નાતિ । સ મહાપાતકોપપાતકૈઃ પ્રમુચ્યતે । સ
બ્રહ્મવર્ચસં મહદાપ્નુયાત્ । આબ્રહ્મણઃ પૂર્વાનાકલ્પાડશ્ચોત્તરાંશ્ચ
વંશાન્પુનીતે । નૈનમપસ્મારાદયો રોગા આદિધેયુઃ । સયક્ષાઃ
સપ્રેતપિશાચા અપ્યેનં સ્પૃષ્ટ્વા દૃષ્ટ્વા શ્રુત્વા વા
પાપિનઃ પુણ્યાંૅલ્લોકાનવાપ્નુયુઃ । ચિન્તિતમાત્રાદસ્ય સર્વેઽર્થાઃ
સિદ્ધ્યેયુઃ । પિતરમિવૈનં સર્વે મન્યન્તે । રાજાનશ્ચાસ્યાદેશકારિણો
ભવન્તિ । ન ચાચાર્યવ્યતિરિક્તં શ્રેયાંસં દૃષ્ટ્વા નમસ્કુર્યાત્ ।
ન ચાસ્માદુપાવરોહેત્ । જીવન્મુક્તશ્ચ ભવતિ । દેહાન્તે તમસઃ પરં
ધામ પ્રાપ્નુયાત્ । યત્ર વિરાણ્ નૃસિંહોઽવભાસતે તત્ર ખલૂપાસતે ।
તત્સ્વરૂપધ્યાનપરા મુનય આકલ્પાન્તે તસ્મિન્નેવાત્મનિ લીયન્તે । ન ચ
પુનરાવર્તન્તે ।

(એતદ્વિદ્યાસમ્પ્રદાનવિધિઃ)

ન ચેમાં વિદ્યામશ્રદ્દ્ધાનાય બ્રૂયાન્નાસૂયાવતે
નાનૂચાનાય નાવિષ્ણુભક્તાય નાનૃતિને નાતપસે નાદાન્તાય
નાશાન્તાય નાદીક્ષિતાય નાધર્મશીલાય ન હિંસકાય નાબ્રહ્મચારિણ
ઇત્યેષોપનિષત્ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં
બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણ-
મસ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે
મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ તત્સત્ ॥

ઇત્યવ્યક્તોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Avyakta Upanishad*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*